# सप्ताश्चर्याणि।

**अवबोधनम्।**

**अ. पूर्णवाक्येन उत्तरं लिखत।**

*१. वरदा **किं** ज्ञातुमिच्छति?

**उत्तर:** वरदा **सप्ताश्चर्यविषये** ज्ञातुमिच्छति।

*२. कोलोसिअम् नाम **किम्?**

**उत्तर:** कोलोसिअम्-फेव्हिन-ॲम्फीथिएटरम् नाम **रोमनगरभूषणम् अर्धवर्तुलाकारं प्रेक्षागृहम्।**

*३. मिस्रदेशे का रचना सप्ताश्चर्येषु एकतमा?

**उत्तर:** मिस्रदेशे **गिझापिरॅमिडरचना** सप्ताश्चर्येषु एकतमा।

४. वरदा सप्ताश्चर्यविषये **किमर्थं** ज्ञातुमिच्छति?

**उत्तर:** वरदा **समाजशास्त्रविषयस्य प्रकल्पार्थं** सप्ताश्चर्यविषये ज्ञातुमिच्छति।

५. सप्ताश्चर्यविषये इदं संज्ञापनं **कस्मात्** प्राप्तम्?

**उत्तर:** सप्ताश्चर्यविषये इदं संज्ञापनं **अन्तर्जालात्** प्राप्तम्।

६. सप्ताङ्क: **कीदृश:?**

**उत्तर:** सप्ताङ्क: **भाग्यदर्शक: स्वामित्वद्योतक:च।**

७. नूतनानि सप्ताश्चर्याणि **कदा** उद्घोषितानि?

**उत्तर:** नूतनानि विश्वसप्ताश्चर्याणि **सप्तशून्यशून्यद्वितमे ख्रिस्ताब्दे (२००७)** उद्घोषितानि।

८. नूतनानि विश्वसप्ताश्चर्याणि **कै:** निर्वाचितानि?

उत्तर: नूतनानि विश्वसप्ताश्चर्याणि **शताधिककोटिरसिकजनै: विश्वत:** निर्वाचितानि।

९. कोलोसिअम् **केन** निर्मितम्?

उत्तर: कोलोसिअम्-फेव्हिन-ॲम्फीथिएटरम् **सम्राट्-व्हेस्पॅशियनमहोदयेन** निर्मितम्।

१०. द्वितीयमाश्चर्यं नाम **किम्**?

उत्तर: द्वितीयमाश्चर्यं नाम **चीनदेशस्थिता मृत्पाषाणेष्टिकामयी विशाला भित्ति:।**

११. चीनदेशस्थिता विशाला भित्ति: **केन** निर्मिता?

उत्तर: चीनदेशस्थिता विशाला भित्ति: **शिंगहाउनटी-नृपेण** निर्मिता।

१२. चीनदेशस्थिता विशाला भित्ति: **किमर्थं** निर्मिता?

उत्तर: चीनदेशस्थिता विशाला भित्ति: **उत्तरकाष्ठास्थितशत्रो: रक्षणार्थं** निर्मिता।

१३. मिस्रदेश: **किमर्थं** जगति विख्यात:?

उत्तर: मिस्रदेश: **पिरॅमिडरचनार्थं** जगति विख्यात:।

**ब. उचितं पर्यायं चित्वा वाक्यं पुनर्लिखत।**

१. विश्वे तथा ________ सप्ताङ्कः विशेषताम् ________ ।

(सर्वधर्मेषु / जनेषु) (आगच्छति / आदधाति)

**उत्तरः** विश्वे तथा **सर्वधर्मेषु** सप्ताङ्कः विशेषताम् **आदधाति**।

२. अङ्कः ________ भाग्यदर्शकः ________ च।

(एतस्मिन् / एषः) (स्वामित्वद्योतकः / गुणदर्शकः)

**उत्तरः** अङ्कः **एषः** भाग्यदर्शकः **स्वामित्वद्योतकः** च।

३. यथा ________ सप्तदिनानि तथैव सप्ताश्चर्याणि जगति ________ ।

(सप्तस्वराः / नवस्वराः) (ख्यातानि / खादितानि)

**उत्तरः** यथा **सप्तस्वराः** सप्तदिनानि तथैव सप्ताश्चर्याणि जगति **ख्यातानि।**

४. ________ विश्वसप्ताश्चर्याणि विश्वतः ________ ।

(प्राचीनानि / नूतनानि) (निर्वाचितानि / प्रेक्षणीयानि)

**उत्तरः** **नूतनानि** विश्वसप्ताश्चर्याणि विश्वतः **निर्वाचितानि।**

५. रोमनगरभूषणम् ________ प्रेक्षागृहं ________ निर्मितम्।

(वर्तुलाकारं / अर्धवर्तुलाकारं)

(शिंगहाउनटी-नृपेण / व्हेस्पॅशियनमहोदयेन)

**उत्तरः** रोमनगरभूषणम् **अर्धवर्तुलाकारं** प्रेक्षागृहं **व्हेस्पॅशियनमहोदयेन** निर्मितम्।

६. द्वितीयमाश्चर्यं नाम ________ मृत्पाषाणेष्टिकामयी ________ भित्तिः।

(चीनदेशस्थिता / रोमनगरस्थिता) (विशाला / शाला)

उत्तरः द्वितीयमाश्चर्यं नाम **चीनदेशस्थिता** मृत्पाषाणेष्टिकामयी **विशाला** भित्तिः।

७. चीनदेशस्थिता विशाला ________ ________ निर्मिता।

(पिरॅमिडरचना / भित्तिः)

(व्हेस्पॅशियनमहोदयेन / शिंगहाउनटी-नृपेण)

उत्तरः चीनदेशस्थिता विशाला **भित्तिः शिंगहाउनटी-नृपेण** निर्मिता।

८. ________ पिरॅमिडरचनार्थं ________ विख्यातः।

(मिस्रदेशः / चीनदेशः) (भारतदेशे / जगति)

उत्तरः **मिस्रदेशः** पिरॅमिडरचनार्थं **जगति** विख्यातः।

९. ________ गिझापिरॅमिडरचना सप्ताश्चर्येषु ________ ।

(एतेषु / एतासु) (एकतमा / एकतमः)

उत्तरः **एतासु** गिझापिरॅमिडरचना सप्ताश्चर्येषु **एकतमा**।

## क. कः कं वदति?

१. सखि वरदे, शुभप्रभातम्।

उत्तरः **वरदायाः सखी वरदां वदति।**

२. अद्य प्रभाते त्वत्तः सन्देशः प्राप्तः।

**उत्तरः वरदायाः सखी वरदां वदति।**

३. सप्ताश्चर्यविषये ज्ञातुमिच्छसि मन्ये।

**उत्तरः वरदायाः सखी वरदां वदति।**

४. अन्तर्जालात् प्राप्तमिदं संज्ञापनं प्रेषयामि।

**उत्तरः वरदायाः सखी वरदां वदति।**

**ड. वाक्यं पुनर्लिखित्वा सत्यं वा असत्यम् इति लिखत।**

१. गणितविषयस्य प्रकल्पार्थं वरदा सप्ताश्चर्यविषये ज्ञातुमिच्छति।

**उत्तरः असत्यम्।**

२. एतत् संज्ञापनं अन्तर्जालात् प्राप्तम्।

**उत्तरः सत्यम्।**

३. विश्वे तथा सर्वधर्मेषु नवाङ्कः विशेषतामादधाति।

**उत्तरः असत्यम्।**

४. सप्ताङ्कः भाग्यदर्शकः अस्ति।

**उत्तरः सत्यम्।**

५. सप्तस्वराः सप्तदिनानि तथैव सप्ताश्चर्याणि जगति ख्यातानि।

**उत्तरः सत्यम्।**

६. कोलोसिअम् नाम वर्तुलाकारं प्रेक्षागृहम्।

**उत्तरः असत्यम्।**

७. कोलोसिअम् उत्तरकाष्ठास्थितशत्रोः रक्षणार्थं निर्मितम्।

उत्तरः **असत्यम्।**

८. चीनदेशस्थिता विशाला भित्तिः शिंगहाउनटी-नृपेण निर्मिता।

उत्तरः **सत्यम्।**

९. चीनदेशः पिरॅमिडरचनार्थं जगति विख्यातः।

उत्तरः **असत्यम्।**

१०. गिझापिरॅमिडरचना सप्ताश्चर्येषु एकतमा।

उत्तरः **सत्यम्।**

## माध्यमभाषया स्वमतप्रकटनम्।

१. एताः सप्त मानवनिर्मिताः रचनाः आश्चर्याणि इति किमर्थं मन्यन्ते? माध्यमभाषया स्वमतं लिखत।


उत्तरः 'सप्ताश्चर्याणि।' या पाठांत जगातील सात नवीन आश्चर्यांचे वर्णन करण्यात आले असून प्रत्येक आश्चर्याविषयी थोडी माहितीही मिळते. इ. स. २००७ मध्ये जगातील नवीन सात आश्चर्ये जाहीर झाली. संपूर्ण जगातील शंभर कोटींहून अधिक लोकांच्या निवडीच्या आधारे या आश्चर्यांची यादी निश्चित केली गेली. ही सर्व

मानवनिर्मित आश्चर्ये अतिशय प्राचीन आहेत. प्राचीन काळी, जेव्हा ह्या वास्तूंची निर्मिती केली गेली, तेव्हा आजच्या तुलनेत तंत्रज्ञान अगदीच अविकसित होते. तसेच साधनसामग्रीचाही तुटवडा होता. तरीही आपल्याला असे आढळून येते की, ह्या वास्तू किंवा रचना अतिप्रचंड, उंच आणि अत्यंत मजबूत आहेत. या वास्तूंनी गेल्या अनेक वर्षांत अनेक ऋतुबदल झेलले आहेत आणि तरीही त्या पूर्वीइतक्याच दिमाखात उभ्या आहेत. अशा महान वास्तूंची बांधणी अतिशय वेळखाऊ असते आणि त्यासाठी मनुष्यबळ आवश्यक असते. यांच्या बांधणीकरिता प्रचंड प्रमाणात साधनसामग्री लागली असणार आणि त्याची दूर अंतरावरून वाहतूकही करावी लागली असणार. उदा. इजिप्तमधील पिरॅमिड्स बांधण्यासाठी प्रचंड आकाराच्या शिळांचा वापर करण्यात आला आहे. या शिळा जवळपास कोठेही सापडत नाहीत.

अशा सर्व घटकांवर आणि समस्यांवर मात करत ह्या वास्तूंची निर्मिती करण्यात आली व त्यांचे सौंदर्य आजही टिकून आहे. म्हणूनच या सात रचनांना 'जगातील आश्चर्ये' असे म्हटले जाते.

## पृथक्करणम्

१. उचितान् शब्दान् लिखित्वा जालरेखाचित्रं पूरयत।




उत्तर: १. **प्रथमाश्चर्यम्।**

२. **चीनदेशे।**

३. **कोलोसिअम्-फेव्हिन-अम्फीथिएटरम्।**

४. **गिझापिरॅमिडरचना।**

## शब्दज्ञानम्।

**अ. गद्यांशे पर्यायशब्दं लिखत ।**

१. प्रातःकाले, प्रातःसमये, प्रत्यूषि = **प्रभाते।**

२. वाञ्छसि = **इच्छसि।**

३. जगति, लोके, संसारे = **विश्वे।**

४. विख्यातानि, प्रकीर्तितानि = **ख्यातानि।**

५. अग्रिमम् , आँद्यम् = **प्रथमम्।**

६. आभूषणम् , अलङ्कारः, अवतंसः = **भूषणम्।**

७. अरिः, रिपुः,द्विषद् = **शत्रुः।**

**ब. गद्यांशे विलोमपदं चित्वा लिखत।**

१. सायङ्काले, रात्रौ × **प्रभाते।**

२. कुख्यातानि × **विख्यातानि।**

३. अन्तिमम्, चरमम् × **प्रथमम्।**

**क. विशेषण-विशेष्य-अन्वितिः।**

१. प्रत्येकविशेष्यस्य द्वे विशेषणे गद्यांशे चित्वा लिखत।

सप्ताङ्कः - ___१___ , ___२___ ।

कोलोसिअम् प्रेक्षागृहम् - ___३___ , ___४___ ।

भित्तिः - ___५___ , ___६___ ।

**उत्तर:** १. **भाग्यदर्शकः।** २. **स्वामित्वद्योतकः।**

३. **रोमनगरभूषणम्।** ४. **अर्धवर्तुलाकारम्।**

५. **मृत्पाषाणेष्टिकामयी।** ६. **विशाला।**

२. योग्यं विशेषणं गद्यांशे चित्वा रिक्तस्थानं पूरयत।

सप्त स्वराः।

___१___ दिनानि।

___२___ आश्चर्याणि।

**उत्तर:** १. **सप्त।** २. **सप्त।**

३. विशेषण-विशेष्ययो: मेलनं कुरुत।

| | 'अ' गट | | 'ब' गट |
|---|---|---|---|
| i. | प्राप्तम् | अ. | विश्वसप्ताश्चर्याणि। |
| ii. | नूतनानि | ब. | गिझापिरॅमिडरचना। |
| iii. | चीनदेशस्थिता | क. | संज्ञापनम्। |
| iv. | एकतमा | ड. | भित्तिः। |

**उत्तर: i. प्राप्तं संज्ञापनम्।**

**ii. नूतनानि विश्वसप्ताश्चर्याणि।**

**iii. चीनदेशस्थिता भित्तिः।**

**iv. एकतमा गिझापिरॅमिडरचना।**

## ड. धातुसाधित-अव्ययानां चयनम्।

१. गद्यांशे आगतं हेत्वर्थक-धातुसाधित-तुमन्त-अव्ययं चिनुत।

**उत्तर: हेत्वर्थक-धातुसाधित-तुमन्त-अव्ययम् –**

**i. ज्ञातुम्।**

२. गद्यांशे पञ्चमी-विभक्त्यन्तपदे चित्वा लिखत।

**उत्तर: i. अन्तर्जालात्।**

**ii. विश्वतः।**

## अवबोधनम्।

**अ. पूर्णवाक्येन उत्तरं लिखत।**

*१. पञ्चमाश्चर्यं कुत्र वर्तते?

उत्तर: पञ्चमाश्चर्यं **नाम 'ख्रिस्त-दि-रिडिमर' इति पुत्तलः ब्राझिलदेशे रिओ-डि-जानिरोनगरसमीपे पर्वते** वर्तते।

*२. चिचेन् इट्झा नगर्याः **कानि** वैशिष्ट्यानि सन्ति?

उत्तर: **मेक्सिकोदेशे विराजमाना अतिप्राचीनमायासंस्कृतेः प्रतीकरूपा 'चिचेन् इट्झा' नाम पुरातनी नगरी विश्वस्य षष्ठाश्चर्यम्।**

३. चतुर्थाश्चर्यं **कुत्र** स्थितम्?

उत्तर: चतुर्थाश्चर्यं **भारतभूमौ एव** स्थितम्।

४. ताजमहालशिल्पं **केन** निर्मितम्?

उत्तर: ताजमहालशिल्पं **शहाजहानसम्राजा** निर्मितम्।

५. शहाजहानसम्राजा ताजमहालः **किमर्थं** निर्मितः?

उत्तर: शहाजहानसम्राजा ताजमहालः **स्वपत्नीस्मरणार्थं** निर्मितः।

६. ताजमहालशिल्पं **कस्य** प्रतीकम्?

उत्तर: ताजमहालशिल्पं **भारतीयस्थापत्यकलायाः अनुपमेयं** प्रतीकम्।

७. ताजमहालस्य शोभा **कीदृशी**?

**उत्तर:** **पौर्णिमायां रात्रौ चन्द्रज्योत्स्नाधवलितस्य** ताजमहालस्य शोभा **अवर्णनीया केवलं स्वसंवेद्या च।**

८. **का** आश्चर्यगणेषु सप्तमा?

**उत्तर:** **जार्डनदेशस्था प्राचीना नगरी पेट्रा** आश्चर्यगणेषु सप्तमा।

९. पेट्रानगरी **कुत्र** विकसिता?

**उत्तर:** पेट्रानगरी **रक्तसमुद्रमृतसमुद्रयोः मध्यप्रदेशे** विकसिता।

**ब. उचितं पर्यायं चित्वा वाक्यं पुनर्लिखत।**

१. शहाजहानसम्राजा ________ एतत् शिल्पं भारतीयस्थापत्यकलायाः ________ प्रतीकम्।

(विनिर्मितम् /विनिर्मिता) (अनुपमेयः / अनुपमेयम्)

**उत्तर:** शहाजहानसम्राजा **विनिर्मितम्** एतत् शिल्पं भारतीयस्थापत्यकलायाः **अनुपमेयं** प्रतीकम्।

२. पौर्णिमायां ________ ताजमहालस्य शोभा ________ ।

(दिने / रात्रौ) (अवर्णनीया / अप्रेक्षणीया)

**उत्तर:** पौर्णिमायां **रात्रौ** ताजमहालस्य शोभा **अवर्णनीया**।

३. रिडिमर नाम ________ एष ________ विराजते।

(पुरुषः / तारकः) (क्रुसाकारें / अर्धवर्तुलाकारे)

**उत्तर:** रिडिमर नाम **तारकः** एष **क्रुसाकारे** विराजते।

४. मायासंस्कृतेः प्रतीकरूपा _______ नाम नगरी विश्वस्य _______।

(चिचेन् इट्झा / पेट्रा) (षष्ठाश्चर्यम् / अष्टमाश्चर्यम्)

उत्तर: मायासंस्कृतेः प्रतीकरूपा **चिचेन् इट्झा** नाम नगरी विश्वस्य **षष्ठाश्चर्यम्**।

५. _______ प्राचीना नगरी पेट्रा _______ सप्तमा।

(मेक्सिकोदेशस्था / जार्डनदेशस्था) (विश्वेषु / आश्चर्यगणेषु)

उत्तर: **जार्डनदेशस्था** प्राचीना नगरी पेट्रा **आश्चर्यगणेषु** सप्तमा।

६. रक्तसमुद्रमृतसमुद्रयोः मध्यप्रदेशे _______ एषा नगरी महत्त्वपूर्णं _______ आसीत्।

(विकसिता / विकसितः) (व्यापारकेन्द्रम् /पर्यटनकेन्द्रम्)

उत्तर: रक्तसमुद्रमृतसमुद्रयोः मध्यप्रदेशे **विकसिता** एषा नगरी महत्त्वपूर्णं **व्यापारकेन्द्रम्** आसीत्।

## क. कः कं वदति?

१. अद्याहं बहुकार्यव्यापृता।

उत्तर: **वरदायाः सखी वरदां वदति।**

२. एतानि सङ्केतस्थलानि निर्दिशामि।

उत्तर: **वरदायाः सखी वरदां वदति।**

३. तव प्रकल्पार्थं शुभाशंसाः।

उत्तर: **वरदायाः सखी वरदां वदति।**

४. अत्र विरमामि। शुभदिनम्।

उत्तर: **वरदायाः सखी वरदां वदति।**

## ङ. वाक्यं पुनर्लिखित्वा सत्यं वा असत्यम् इति लिखत।

१. चतुर्थाश्चर्यं भारतभूमौ स्थितम्।

उत्तरः **सत्यम्।**

२. शहाजहानसम्राजा निर्मितं शिल्पं चीनस्थापत्यकलायाः अनुपमेयं प्रतीकम्।

उत्तरः **असत्यम्।**

३. पौर्णिमायां दिने ताजमहालस्य शोभा अवर्णनीया स्वसंवेद्या च।

उत्तरः **असत्यम्।**

४. 'ख्रिस्त-दि-रिडिमर' इति पुत्तलः सागरे स्थितः।

उत्तरः **असत्यम्।**

५. रिडिमर नाम तारकः क्रुसाकारे विराजते।

उत्तरः **सत्यम्।**

६. मायासंस्कृतिः अतिप्राचीना विकसिता आसीत्।

उत्तरः **सत्यम्।**

७. प्राचीना नगरी पेट्रा महत्त्वपूर्णं पर्यटनकेन्द्रमासीत्।

उत्तरः **असत्यम्।**

## माध्यमभाषया स्वमतप्रकटनम्।

१. 'सप्ताश्चर्याणां संरक्षणं कथं करणीयं स्यात्' इति भवतः मतम्।


**उत्तर:** 'सप्ताश्चर्याणि।' या पाठात जगातील सात नवीन आश्चर्यांचे वर्णन करण्यात आले असून प्रत्येक आश्चर्याविषयी थोडी माहितीही मिळते.

इ. स. २००७ मध्ये जगातील नवीन सात आश्चर्ये जाहीर झाली. संपूर्ण जगातील शंभर कोटींहून अधिक लोकांच्या निवडीच्या आधारे या आश्चर्यांची यादी निश्चित करण्यात आली. या आश्चर्यांची निवड आपणच केलेली असल्यामुळे त्यांचे संरक्षण ही आपलीच जबाबदारी आहे. अनेक वेळा असे दिसून येते, की या वास्तूंना भेट देणारे पर्यटक तेथे कचरा फेकतात आणि त्या जागा घाण करतात. तसेच अनेक पर्यटक या वास्तूंच्या भिंतींवर रेघोट्या ओढतात. आसपासच्या भागातील प्रदूषण, धूर, आवाज, धूळ इत्यादी घटकांमुळे या स्मारकांचा प्रदेश खराब होतो. ज्यामुळे या प्राचीन सौंदर्य मिरवणाऱ्या वास्तूंची हानी होईल, असे वर्तन आपण निग्रहाने टाळले पाहिजे. आपण या वास्तूंची जागा स्वच्छ आणि व्यवस्थित ठेवली पाहिजे. त्याचबरोबर शासनाने या वास्तूंचे जतन करण्यासाठी कडक कायदेही अमलात आणणे आवश्यक आहे.

अशा प्रकारे, आपण नागरिक आणि शासन या दोघांनीही एकत्रितरीत्या या आश्चर्यांचे जतन करण्यासाठी प्रयत्न केले पाहिजेत.

## पृथक्करणम्।

१. जालरेखाचित्रे उचितानि उत्तराणि लिखत।




**Ans.**

| | |
|---|---|
| १. भारतदेश:। | २. ताजमहाल:। |
| ३. पञ्चमम्। | ४. ब्राझिलदेश:। |
| ५. षष्ठम्। | ६. चिचेन् इट्झा। |
| ७. जार्डन्नदेश:। | ८. पेट्रा। |

२. स्तम्भमेलनं कुरुत।

| | 'अ' गट | | 'ब' गट |
|---|---|---|---|
| i. | ताजमहाल: | अ. | तारक: क्रुसाकारे विराजते। |
| ii. | पेट्रा | ब. | भारतीयस्थापत्यकलाया: प्रतीकम्। |
| iii. | चिचेन् इट्झा | क. | रक्तसमुद्रमृतसमुद्रयो: मध्यप्रदेशे विकसिता नगरी। |
| iv. | ख्रिस्त-दि-रिडिमर | ड. | मायासंस्कृते: प्रतीकरूपा नगरी। |

**उत्तर: i. ताजमहाल: - भारतीयस्थापत्यकलाया: प्रतीकम्।**

**ii. पेट्रा - रक्तसमुद्रमृतसमुद्रयो: मध्यप्रदेशे विकसिता नगरी।**

**iii. चिचेन् इट्झा - मायासंस्कृते: प्रतीकरूपा नगरी।**

**iv. ख्रिस्त-दि-रिडिमर - तारक: क्रुसाकारे विराजते।**

## शब्दज्ञानम्।

**अ. गद्यांशे पर्यायवाचिशब्दं चिनुत।**

| | | | |
|---|---|---|---|
| १. | अतुलम्, अप्रतिरूपम्, अतुल्यम्, अपूर्वम् | = | **अनुपमेयम्।** |
| २. | चिह्नम्,लक्षणम्, केतनम् | = | **प्रतीकम्।** |
| ३. | पूर्णिमा | = | **पौर्णिमा।** |
| ४. | हिमांशु:, चन्द्रमा:, शशी, इन्दु:, कलानिधि: | = | **चन्द्र:।** |
| ५. | चन्द्रिका, कौमुदी, चन्द्रप्रभा | = | **ज्योत्स्ना।** |
| ६. | अनिर्वचनीया, अवक्तव्या, अवर्ण्या | = | **अवर्णनीया।** |
| ७. | राजते, विलसति, शोभते | = | **विराजते।** |
| ८. | प्राचीना | = | **पुरातनी।** |
| ९. | भूरि, प्रभूतम्, विपुलम् | = | **अनल्पम्।** |

**ब. विलोमपदं चिनुत।**

| | | | |
|---|---|---|---|
| १. | उपमेयम् | × | **अनुपमेयम्।** |
| २. | अमावास्या | × | **पौर्णिमा।** |
| ३. | वर्णनीया | × | **अवर्णनीया।** |
| ४. | अर्वाचीना, नूतना | × | **प्राचीना,पुरातनी।** |
| ५. | अविकसिता | × | **विकसिता।** |
| ६. | अल्पम्, स्वल्पम्, स्तोकम् | × | **अनल्पम्।** |
| ७. | प्रारभे, आरभे | × | **विरमामि।** |

**क. विशेषण-विशेष्य-अन्विति:।**

१. स्तम्भमेलनं कुरुत।

| | 'अ' गट | | 'ब' गट |
|---|---|---|---|
| i. | अवर्णनीया | अ. | नगरी |
| ii. | धवलितस्य | ब. | प्रतीकम् |
| iii. | अनुपमेयम् | क. | ताजमहालस्य |
| iv. | पुरातनी | ड. | शोभा |

उत्तर: **i. अवर्णनीया शोभा।**

**ii. धवलितस्य ताजमहालस्य।**

**iii. अनुपमेयं प्रतीकम्।**

**iv. पुरातनी नगरी।**

**ड. धातुसाधित-अव्ययानां चयनम् / विभक्त्यन्तपदानां चयनम्।**

१. गद्यांशे आगतं पूर्वकालवाचक-ल्यबन्त-अव्ययं चित्वा लिखत।

उत्तर: **अनुसृत्य।**

२. गद्यांशे आगतं तृतीया-विभक्त्यन्तपदं चित्वा लिखत।

उत्तर: **त्वया।**

## कृतिपत्रिकायाः तृतीयः विभागः - व्याकरणम्।

### सन्धयः।

| | | | |
|---|---|---|---|
| *१. | ज्ञातुमिच्छामि | = | **ज्ञातुम् + इच्छामि।** |
| *२. | विशेषतामादधाति | = | **विशेषताम् + आदधाति।** |
| *३. | जानास्येव | = | **जानासि + एव।** |
| *४. | अद्याहम् | = | **अद्य + अहम्।** |
| *५. | एतदेवालम् | = | **एतत् + एव + अलम्।** |
| *६. | भारतभूमावेव | = | **भारतभूमौ + एव।** |
| *७. | मायासंस्कृतिरतिप्राचीना | = | **मायासंस्कृतिः + अतिप्राचीना।** |
| *८. | स्यात्तर्हि | = | **स्यात् + तर्हि।** |
| ९. | एतदभिमानास्पदम् | = | **एतत् + अभिमानास्पदम्।** |
| १०. | विनिर्मितमेतत् | = | **विनिर्मितम् + एतत्।** |
| ११. | चन्द्रज्योत्स्नाधवलितस्यैतस्य | = | **चन्द्रज्योत्स्नाधवलितस्य + एतस्य।** |
| १२. | विकसितैषा | = | **विकसिता + एषा।** |
| १३. | व्यापारकेन्द्रमासीत् | = | **व्यापारकेन्द्रम् + आसीत्।** |
| १४. | एकैकमाश्चर्यमनुसृत्य | = | **एकैकम् + आश्चर्यम् + अनुसृत्य।** |
| १५. | अन्तर्जालतोऽनल्पम् | = | **अन्तर्जालतः + अनल्पम्।** |
| १६. | यद्यधिकम् | = | **यदि + अधिकम्।** |

### पदपरिचयः।

**धातवः।**

**वर्तमानकालः।**

| क्र. | रूपम् | मूलधातुः | गणः, पदम् | कालः / अर्थः | पुरुषः | वचनम् |
|---|---|---|---|---|---|---|
| *१. | आदधाति | आ + धा | ३ उ.प. येथे प.प. | वर्तमानकालः | तृतीयः | एकवचनम् |
| २. | इच्छसि | इष् – इच्छ् | ६ प.प. | वर्तमानकालः | द्वितीयः | एकवचनम् |
| ३. | मन्ये | मन् | ४ आ.प. | वर्तमानकालः | प्रथमः | एकवचनम् |
| ४. | जानासि | ज्ञा | ९ उ.प. येथे प.प. | वर्तमानकालः | द्वितीयः | एकवचनम् |
| ५. | विराजते | वि + राज् | १ उ.प. येथे आ.प. | वर्तमानकालः | तृतीयः | एकवचनम् |
| ६. | निर्दिशामि | निर् + दिश् | ६ उ.प. येथे प.प. | वर्तमानकालः | प्रथमः | एकवचनम् |
| ७. | विरमामि | वि + रम् | १ प.प. | वर्तमानकालः | प्रथमः | एकवचनम् |

**विध्यर्थः।**

| क्र. | रूपम् | मूलधातुः | गणः, पदम् | कालः / अर्थः | पुरुषः | वचनम् |
|---|---|---|---|---|---|---|
| *८. | स्यात् | अस् | २ प.प. | विध्यर्थः | तृतीयः | एकवचनम् |

**कर्मणि**

| | | | | | | |
|---|---|---|---|---|---|---|
| *९. | ज्ञायते | ज्ञा | ९ उ.प. | कर्मणि, वर्तमानकालः | तृतीयः | एकवचनम् |

## प्रयोजकम्।

| क्र. | रूपम् | मूलधातुः | गणः, पदम् | प्रयोजकम् | कालः / अर्थः | | पुरुषः | वचनम् |
|---|---|---|---|---|---|---|---|---|
| *१०. | प्रेषयामि | प्रेष् | १ उ.प. | प्रयोजकम् | वर्तमानकालः | | प्रथमः | एकवचनम् |
| **क्र.** | **रूपम्** | **मूलधातुः** | **गणः, पदम्** | **प्रयोजकम्** | **भूतकालवाचकम्** | **लिङ्गम्** | **विभक्तिः** | **वचनम्** |
| *११. | निर्वाचितानि | निर् + वच् | २ प.प. | प्रयोजकम् | कर्मणि-भू-धा-वि. | नपुंसकलिङ्गम् | प्रथमा, द्वितीया, सम्बोधनम् | बहुवचनम् |

## पूर्वकालवाचक – धातुसाधित – अव्ययानि।

| क्र. | रूपम् | मूलधातुः | गणः, पदम् | पूर्वकालवाचकम्। |
|---|---|---|---|---|
| *१२. | अनुसृत्य | अनु + सृ → सर् | १ प.प. | ल्यबन्त-अव्ययम्। |

## हेत्वर्थक – धातुसाधित – अव्ययानि।

| क्र. | रूपम् | मूलधातुः | गणः, पदम् | हेत्वर्थक-धातुसाधितम् |
|---|---|---|---|---|
| *१३. | ज्ञातुम् | ज्ञा | ९ उ.प. | तुमन्त-अव्ययम्। |

## कर्मणि – विध्यर्थक – धातुसाधित – विशेषणानि।

| क्र. | रूपम् | मूलधातुः | गणः, पदम् | विध्यर्थकम् | लिङ्गम् | विभक्तिः | वचनम् |
|---|---|---|---|---|---|---|---|
| *१४. | ज्ञातव्यम् | ज्ञा | ९ उ.प. | कर्मणि-वि-धा-वि. | पुंलिङ्गम्<br>नपुंसकलिङ्गम् | द्वितीया<br>प्रथमा, द्वितीया | एकवचनम्<br>एकवचनम् |
| १५. | अवर्णनीया | अ + वर्ण् | १० उ.प. 'अ' हा नकारार्थी वापरलेला आहे. | कर्मणि-वि-धा-वि. | स्त्रीलिङ्गम् | प्रथमा | एकवचनम् |

**कर्मणि – भूतकालवाचक – धातुसाधित – विशेषणानि।**

| क्र. | रूपम् | मूलधातुः | गणः, पदम् | भूतकालवाचकम् | लिङ्गम् | विभक्तिः | वचनम् |
|---|---|---|---|---|---|---|---|
| *१६. | व्यापृता | वि + आ + पृ | ९ प.प. | कर्मणि-भू-धा-वि. | स्त्रीलिङ्गम् | प्रथमा | एकवचनम् |
| १७. | प्राप्तः | प्र + आप् | ५ प.प. | कर्मणि-भू-धा-वि. | पुंलिङ्गम् | प्रथमा | एकवचनम् |
| १८. | उद्घोषितानि | उद् + घुष् → घोष् | १० उ.प. | कर्मणि-भू-धा-वि. | नपुंसकलिङ्गम् | प्रथमा, द्वितीया, सम्बोधनम् | बहुवचनम् |

**कर्तरि – भूतकालवाचक – धातुसाधित – विशेषणानि।**

| क्र. | रूपम् | मूलधातुः | गणः, पदम् | भूतकालवाचकम् | लिङ्गम् | विभक्तिः | वचनम् |
|---|---|---|---|---|---|---|---|
| *१९. | विख्यातानि | वि + ख्या | २ प.प. (अकर्मक धातू) | कर्तरि-भू-धा-वि. | नपुंसकलिङ्गम् | प्रथमा, द्वितीया, सम्बोधनम् | बहुवचनम् |
| *२०. | विकसिता | वि + कस् | १ प.प. | कर्तरि-भू-धा-वि. | स्त्रीलिङ्गम् | प्रथमा | एकवचनम् |
| २१. | स्थितम् | स्था – तिष्ठ् | १ प.प. (अकर्मक धातू) | कर्तरि-भू-धा-वि. | पुंलिङ्गम्<br>नपुंसकलिङ्गम् | द्वितीया<br>प्रथमा, द्वितीया | एकवचनम्<br>एकवचनम् |

**वर्तमानकालवाचक – धातुसाधित – विशेषणानि।**

| क्र. | रूपम् | मूलधातुः | गणः, पदम् | वर्तमानकालवाचकम् | लिङ्गम् | विभक्तिः | वचनम् |
|---|---|---|---|---|---|---|---|
| *२२. | विराजमाना | वि + राज् | १ उ.प. येथे आ.प. | कर्तरि-व-का-धा-वि. | स्त्रीलिङ्गम् | प्रथमा | एकवचनम् |

**नामानि।**

| क्र. | रूपम् | प्रातिपदिकम् | प्रकारः | लिङ्गम् | विभक्तिः | वचनम् |
|---|---|---|---|---|---|---|
| *२३. | पुरातनी | पुरातनी | ईकारान्तम् | स्त्रीलिङ्गम् | प्रथमा | एकवचनम् |
| *२४. | रात्रौ | रात्रि | इकारान्तम् | स्त्रीलिङ्गम् | सप्तमी | एकवचनम् |
| २५. | जगति | जगत् | तकारान्तम् | नपुंसकलिङ्गम् | सप्तमी | एकवचनम् |

**सर्वनामानि।**

| क्र. | रूपम् | प्रातिपदिकम् | पुरुषवाचकः | लिङ्गम् | विभक्तिः | वचनम् |
|---|---|---|---|---|---|---|
| २६. | एतासु | एतद् | तृतीयपुरुषः | स्त्रीलिङ्गम् | सप्तमी | बहुवचनम् |
| २७. | त्वया | युष्मद् | द्वितीयपुरुषः | त्रिषु लिङ्गेषु समानम् | तृतीया | एकवचनम् |

## समासपरिचयः।

### विभक्ति – तत्पुरुषः।

| क्र. | समस्तपदम् | विग्रहः | विभक्तिः | समासनाम |
|---|---|---|---|---|
| *१. | रक्षणार्थम् | रक्षणाय इदम्। (रक्षणासाठी) | – | चतुर्थी-तत्पुरुषः। |
| *२. | प्रकल्पार्थम् | प्रकल्पाय इदम्। (प्रकल्पासाठी) | – | चतुर्थी-तत्पुरुषः। |
| *३. | भारतभूमि | भारतस्य भूमिः। (भारताची भूमी) | – | षष्ठी-तत्पुरुषः। |
| *४. | चन्द्रज्योत्स्ना | चन्द्रस्य ज्योत्स्ना। (चंद्राचा प्रकाश) | – | षष्ठी-तत्पुरुषः। |
| ५. | महत्त्वपूर्णम् | महत्त्वेन पूर्णम्। (महत्त्वाने पूर्ण) | – | तृतीया-तत्पुरुषः। |
| ६. | प्रेक्षागृहम् | प्रेक्षायै गृहम्। (पाहण्यासाठी घर) | – | चतुर्थी-तत्पुरुषः। |
| ७. | भाग्यदर्शकः | भाग्यस्य दर्शकः। (भाग्याचा दर्शक) | – | षष्ठी-तत्पुरुषः। |
| ८. | स्वामित्वद्योतकः | स्वामित्वस्य द्योतकः। (स्वामित्वाचे द्योतक) | – | षष्ठी-तत्पुरुषः। |
| ९. | सङ्केतस्थलानि | सङ्केतस्य स्थलानि। (संकेताचे स्थळ) | – | षष्ठी-तत्पुरुषः। |

### नञ् – तत्पुरुषः।

| क्र. | समस्तपदम् | विग्रहः | विभक्तिः | समासनाम |
|---|---|---|---|---|
| *१०. | अनुपयेम् | न उपमेयम्। (उपमा देता येणार नाही असे) | – | नञ्-तत्पुरुषः। |
| *११. | अवर्णनीया | न वर्णनीया। (वर्णन करता येणार नाही अशी) | – | नञ्-तत्पुरुषः। |
| १२. | अनल्पम् | न अल्पम्। (कमी नसणारे) | – | नञ्-तत्पुरुषः। |

### उपपद – तत्पुरुषः।

| क्र. | समस्तपदम् | विग्रहः | विभक्तिः | समासनाम |
|---|---|---|---|---|
| *१३. | पर्वतस्थः | पर्वते तिष्ठति इति। (पर्वतावर राहणारा) | – | उपपद-तत्पुरुषः। |

**कर्मधारय:।**

| क्र. | समस्तपदम् | विग्रह: | विभक्ति: | समासनाम |
|---|---|---|---|---|
| *१४ | सप्ताश्चर्याणि | सप्त आश्चर्याणि।<br>(सात आश्चर्य) | – | विशेषण-पूर्वपद-कर्मधारय:। |
| *१५ | सर्वधर्मेषु | सर्वे धर्मा:।<br>(सर्व धर्म) | तेषु। | विशेषण-पूर्वपद-कर्मधारय:। |
| १६. | प्रथमाश्चर्यम् | प्रथमम् आश्चर्यम्।<br>(पहिले आश्चर्य) | – | विशेषण-पूर्वपद-कर्मधारय:। |
| १७. | अर्धवर्तुलाकारम् | i. अर्धं वर्तुलम्। अर्धवर्तुलम्।<br>(अर्ध वर्तुळ)<br>ii. अर्धवर्तुल: आकार: यस्य तद्।<br>(जे अर्धवर्तुळाकार आहे ते) | –<br><br>– | विशेषण-पूर्वपद-कर्मधारय:।<br><br>समानाधिकरण-बहुव्रीहि:। |
| १८. | शुभाशंसा: | शुभा: आशंसा:।<br>(शुभ इच्छा) | – | विशेषण-पूर्वपद-कर्मधारय:। |
| १९. | सप्ताङ्क: | सप्त इति अङ्क:।<br>(सात आकडा) | – | कर्मधारय:। |
| २०. | एकैकम् | एकम् एकम्।<br>(एक एक) | – | कर्मधारय:। |
| २१. | बहुकार्यव्यापृता | i. बहूनि कार्याणि। बहुकार्याणि।<br>(खूप कामे)<br>ii. बहुकार्येषु व्यापृता।<br>(खूप कामात व्यग्र) | –<br><br>– | विशेषण-पूर्वपद-कर्मधारय:।<br><br>सप्तमी-तत्पुरुष:। |
| २२. | रोमनगरभूषणम् | i. रोम नाम नगरम्। रोमनगरम्।<br>(रोम शहर)<br>ii. रोमनगरस्य भूषणम्।<br>(रोम शहराचे भूषण) | –<br><br>– | विशेषनाम-सामान्यनाम-कर्मधारय:।<br><br>षष्ठी-तत्पुरुष:। |